श्रीराधा-अष्टोत्तरशतनामस्तोत्रम्

ईश्वर उवाच

अथास्याः सम्प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् । यस्य सङ्कीर्तनादेव श्रीकृष्णं वशयेद् ध्रुवम्॥ १ ॥
राधिका सुन्दरी गोपी कृष्णसङ्गमकारिणी । चञ्चलाक्षी कुरङ्गाक्षी गान्धर्वी वृषभानुजा॥ २ ॥
वीणापाणिः स्मितमुखी रक्ताशोकलतालया । गोवर्धनचरी गोप्या गोपीवेषमनोहरा॥ ३ ॥
चन्द्रावलीसपत्नी च दर्पणास्या कलावती। कृपावती सुप्रतीका तरुणी हृदयङ्गमा॥ ४ ॥
कृष्णप्रिया कृष्णसखी विपरीतरतिप्रिया। प्रवीणा सुरतप्रीता चन्द्रास्या चारुविग्रहा॥ ५ ॥
केकराक्षी हरेः कान्ता महालक्ष्मी सुकेलिनी । सङ्केतवटसंस्थाना कमनीया च कामिनी॥ ६ ॥
वृषभानुसुता राधा किशोरी ललिता लता। विद्युद्वल्ली काञ्चनाभा कुमारी मुग्धवेशिनी॥ ७ ॥
केशिनी केशवसखी नवनीतैकविक्रया। षोडशाब्दा कलापूर्णा जारिणी जारसङ्गिनी॥ ८ ॥
हर्षिणी वर्षिणी वीरा धीरा धारा धरा धृतिः । यौवनस्था वनस्था च मधुरा मधुराकृतिः॥ ९ ॥
वृषभानुपुरावासा मानलीलाविशारदा। दानलीला दानदात्री दण्डहस्ता भ्रुवोन्नता॥ १० ॥
सुस्तनी मधुरास्या च बिम्बोष्ठी पञ्चमस्वरा। सङ्गीतकुशला सेव्या कृष्णवश्यत्वकारिणी॥ ११ ॥
तारिणी हारिणी ह्रीला शीला लीला ललामिका। गोपाली दधिविक्रेत्री प्रौढा मुग्धा च मध्यका॥ १२ ॥
स्वाधीनपतिका चोक्ता खण्डिता याभिसारिका। रसिका रसिनी रस्या रसशास्त्रैकशेवधिः॥ १३ ॥
पालिका लालिका लज्जा लालसा ललनामणिः। बहुरूपा सुरूपा च सुप्रसन्ना महामतिः॥ १४ ॥
मरालगमना मत्ता मन्त्रिणी मन्त्रनायिका। मन्त्रराजैकसंसेव्या मन्त्रराजैकसिद्धिदा॥ १५ ॥
अष्टादशाक्षरफला अष्टाक्षरनिषेविता। इत्येतद्राधिकादेव्या नाम्नामष्टोत्तरं शतम्॥ १६ ॥
कीर्तयेत्प्रातरुत्थाय कृष्णवश्यत्वसिद्धये। एकैकनामोच्चारेण वशीभवति केशवः॥ १७ ॥

॥ इत्यूर्ध्वाम्नाये श्रीराधाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥